दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लत्रयोदशी
ज्येष्ठ 14 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-215 | 1 | मई 28, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 विधायकः भवितुं काऽपि परीक्षा किमर्थं न भवति? मुख्यमन्त्री-सुक्खू-महोदयं दशमीकक्षायाः छात्रः अपृच्छत्

3 मुख्यमन्त्रिणा सुक्खुना 'सिटी लिमिट्स' इति पुस्तकस्य कृतं विमोचनम् अकथयत् च पर्यावरणसन्तुलनं सुनियोजितनिर्माणं च राज्यस्य प्राथमिकता

5 अराजकतया सह कश्चिदपि सन्धि न, बिहारे केवलं सुशासनमेव प्रवर्तिष्यते, सुशासनेनैव समृद्धिरागमिष्यति– विजयकुमारसिन्हः

## शिक्षा एव सशक्तीकरणस्य परममार्गः अस्ति-राष्ट्रपतिः




राष्ट्रपतिपदासीना द्रौपदी-मुर्मुः सबलं प्रोक्तवती यत् देशस्य विकासाय पूर्वोत्तर-क्षेत्रस्य विकासः सर्वथा अनिवार्यः वर्तते। गङ्गटोक-नगरे सिक्किम-विश्वविद्यालयस्य दीक्षान्त समारोहं सम्बोधयन्ती सा छात्रान् स्वकीय-विचारैः, नवोन्मेषेण च राष्ट्र-निर्माण योगदानं विधातुं परामर्श प्रदत्तवती तथा च अवदत् यत् शिक्षा एव सशक्तीकरणस्य परममार्गः अस्ति।

## वाणिद्योगमन्त्री पीयूष गोयलः टोरन्टो-नगरे वरिष्ठ-व्यापारिक-नेतृभिः संस्थागत-निवेशकैः च सह उच्च-स्तरीयोपवेशनं विहितवान्



हिमसंस्कृतवार्ता। कनाडा-यात्रायाः द्वितीये दिवसे भारतस्य वाणिद्योगमन्त्री पीयूष गोयलः टोरन्टो-नगरे वरिष्ठ-व्यापारिक-नेतृभिः संस्थागत-निवेशकैः च सह उच्च-स्तरीयोपवेशनं विहितवान्। श्रीगोयलः कनाडा-देशस्य अन्ताराष्ट्रिय-व्यापारमन्त्रिणा मनिन्दर-सिद्धू इत्यमुना सह साक्षात्कृत्य भारत-कनाडा व्यापार-पारिस्थितिकी-तन्त्रस्य आवश्यकतायाम् बलं प्रदत्तवान्। उभाभ्यां पक्षाभ्यां 2030 वर्षं यावत् द्विपक्षीय व्यापारं 50 अरब अमेरिकी-डॉलर-परिमितं वर्धयितुम्, तथा च 2026 वर्षस्य आन्तं यावत् सीपा-सन्धिं (CEPA) दृढीकर्तुमपि लक्ष्यं स्मृतम्। प्रवासी-भारतीयान् सम्बोधयन् श्रीगोयलः कनाडा-देशे भारतीय समुदायस्य शक्तिम्, भारत-कनाडा-व्यापार-मार्गस्य सुदृढीकरणे तस्य महतीं भूमिकाञ्च प्रतिपादितवान्।

## आर्थिक-प्रकरण-मन्त्रिमण्डल-समित्या षोडश-वित्तायोगस्य पुरस्कारचक्रावधौ 'सार्थक-पी.डी.एस.' इति अम्रला-योजनायाः *निरन्तरतायै त्रिंशदधिक-पञ्चशतोत्तर-पञ्चविंशति-सहस्रकोटि-रूप्यकाणां केन्द्रीय-विनियोगः करिष्यते*

आर्थिक-प्रकरण-मन्त्रिमण्डल-समित्या षोडश-वित्तायोगस्य पुरस्कारचक्रावधौ 'सार्थक-पी.डी.एस.' इति अम्रला-योजनायाः निरन्तरतायै त्रिंशदधिक-पञ्चशतोत्तर-पञ्चविंशतिसहस्रकोटि-रूप्यकाणां केन्द्रीय-विनियोगः करिष्यते।अश्विनी-वैष्णवः अवदत् यत्, इयं योजना राज्य-संस्थाभ्यः राज्यान्तर्गत-खाद्यान्न-परिवहनाय साहाय्यं प्रदास्यति, सहैव उचित मूल्यापणानां सुदृढीकरणं करिष्यति, तथा च सार्वजनिक-वितरण-प्रणाल्याः आधुनिकीकरणेऽपि सहयोगं करिष्यति। अस्याम् योजनायां कृत्रिम-मेधायां (AI) आधारिताः 'निर्मल'(वास्तविक-समय-पी.डी.एस.-लाभार्थी-पञ्जीकरण-मञ्चः), 'आशा' (बहुभाषीय जन-परिदेवना-निवारण-



प्रणाली तथा नागरिक-संवाद-मञ्चः) एवं च 'सक्षम' (आपूर्तिशृङ्खला प्रबन्धन तन्त्रम्) इति त्रयः घटकाः भविष्यन्ति। अनेन सहैव राज्यान्तर्गत-खाद्यान्न-परिवहन-व्ययस्य तथा उचित-मूल्य-आपण-विक्रेतृणाम् लाभांश-सीमायाः पूर्त्यै केन्द्रीय-सहायता-नियमेषु संशोधनस्य दृढ-निर्णयः कृतः।

## सर्वोच्च न्यायालयेन भारत-निर्वाचनायोगेन प्रदत्ता मतदातृ-सूच्यः विशेष-गहन-पुनरीक्षणस्य वैधता प्रमाणीकृता



सर्वोच्च न्यायालयेन भारत-निर्वाचनायोगेन प्रदत्ता मतदातृ-सूच्यः विशेष-गहन-पुनरीक्षणस्य वैधता प्रमाणीकृता, यत् निष्पक्ष स्वतन्त्र-निर्वाचनानां संवैधिनक-अनिवार्यतां संवर्धयति। जनप्रतिनिधित्व-अधिनियमस्य (1950) तथा 324-अनुच्छेदस्य नियमानुसारं निर्वाचनायोगस्य पार्श्वे विशेष-गहन-पुनरीक्षणस्य पूर्णा शक्तिः वर्तते।मुख्यन्यायाधीशस्य सूर्यकान्तस्य तथा च न्यायाधीशस्य जायमाल्य-बागचि इत्यनयोः पीठेन एतत् निर्णय-वचनं बिहार-राज्ये विशेष-गहन-पुनरीक्षणार्थं प्रसारित अधिसूचनायाः सन्दर्भ प्रख्यापितं।

## केन्द्रीयान्वेषणाभिकरणेन (CBI) नीट-प्रश्नपत्र-गोपनभङ्ग-प्रकरणे त्रयोदश-आरोपिणः निगृहीताः




केन्द्रीयान्वेषणाभिकरणेन (CBI) नीट-प्रश्नपत्र-गोपनभङ्ग-प्रकरणे दिल्ली-जयपुर-गुरुग्राम-नासिक-पुणे-लातूर-अहिल्यानगरेभ्यः एतावता त्रयोदश-आरोपिणः निगृहीताः। लातूर-वास्तव्यः चिकित्सकः डॉ. मनोज-शिरूरे निगडितः, येन सह अभियुक्त-पी.वी. कुलकर्णी इत्यमुना रसायनशास्त्रस्य प्रश्नान् प्रापयितुं मुख्य-भूमिकां निर्व्यूढा। अपरः निगृहीतः अभियुक्तः तेजस-हर्षदकुमार-शाहः वर्तते, यः पुणे-नगरस्य 'डॉ. अभंग-प्रभु-मेडिकल-अकादमी' इति कोचिंग-संस्थायां भौतिकशास्त्रस्य प्राध्यापकः अस्ति।सीबीआई द्वारा एतावता देशस्य 49 स्थानेषु सहसान्वेषणं विहितम्, यत्र अनेके आपत्तिजनक-अभिलेखाः, अङ्कीय-सङ्गणकाः च स्वायत्तीकृतानि।

## सुभाषितम्

**अकृत्यं नैव कर्तव्यं, प्राणत्यागेऽपि संस्थिते।**
**न च कृत्यं परित्याज्यम्, एष धर्मः सनातनः।।**

भावार्थः- न्याय व्यवस्था, धर्म तथा समाज द्वारा निषिद्ध घोषित किए गए कार्य मृत्युसंकट उपस्थित होने पर भी नहीं करने चाहिए तथा अपने दैनिक कार्यों को भी नहीं त्यागना चाहिए, क्योंकि भारतीय सनातन धर्म है।

दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## "वन्दे संस्कृतमातरम्"
## "लौकिकन्यायकोशः"
## "जलतरङ्गन्यायः"

वायोः वेगवशात् जलाशये जलस्य उपरि लहर्यः उत्पद्यन्ते। तेन जले जलं,लहर्यः,फेन इति विविधं नवीनं च परिवर्तनं जातमिव भाति। तेषु सर्वेषु अपि जलगताः धर्माः एव भवन्ति। रूपस्य परिवर्तने अपि धर्मपरिवर्तनं न भवति। एवं कस्मिन्नपि पदार्थे जातानि परिवर्तनानि मूलद्रव्यपेक्षया भिन्नानि न भवन्तीति अनेन न्यायेन सूच्यते। पश्यन्तु- माधुर्यद्रवशैत्यादिनीरधर्मास्तरङ्गके। अनुपम्याथ तमिष्टे फेनेऽप्यनुगता यथा।।

डा. वर्षा प्रकाश टोणगांवकर
पुणे / महाराष्ट्रम्

# विधायकः भवितुं काऽपि परीक्षा किमर्थं न भवति?

## मुख्यमन्त्री-सुक्खू-महोदयं दशमीकक्षायाः छात्रः अपृच्छत्



**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्री सुखविन्द्रसिंहसुक्खूः बुधवासरे शिमला-जनपदस्य राजकीय-वरिष्ठ-माध्यमिक-विद्यालय-नेरवा इत्यस्य छात्रैः सह संवादं कृतवान्। एषः विद्यालयः सम्प्रत्येव सी.बी.एस.ई. पाठ्यक्रमान्तर्गतं आनीतम् अस्ति। अस्मिन् अवसरे मुख्यमन्त्रिणा उक्तं यत् राज्यसर्वकारेण सार्धशततः (१५०) अधिकेषु विद्यालयेषु सी.बी.एस.ई.-पाठ्यक्रमः प्रारब्धः। सः अवदत् यत् छात्रैः सह संवादेन तेषां समस्यानां अवगमनस्य तथा शिक्षाव्यवस्थायां उन्नयनस्य अवसरः प्राप्यते। मुख्यमन्त्रिणा प्रतिपादितं यत् विद्यालयस्य सी.बी.एस.ई.-संस्थानत्वेन परिवर्तनात् परं नेरवा-विद्यालये छात्राणां सङ्ख्यायां उल्लेखनीयवृद्धिः अभवत्। अतः राज्यसर्वकारेण विद्यालयं द्वाभ्यां पर्यायाभ्यां (शिफ्ट) सञ्चालयितुम् अनुमतिः प्रदत्ता। सः अवदत् यत् नेरवा-क्षेत्रे पञ्चकोटिरूप्यकाणां व्ययेन नवीनं विद्यालयभवनं निर्मितं भविष्यति, अस्य निर्माणकार्यं वर्षद्वयाभ्यन्तरे पूर्णं करिष्यते। राज्यसर्वकारः शिक्षाक्षेत्रस्य सुदृढीकरणाय निरन्तरं कार्यं करोति, यस्य च सकारात्मकपरिणामाः सम्मुखम् आगच्छन्ति।

## छात्रैः मुख्यमन्त्रिणं प्रति विभिन्नेषु विषयेषु प्रश्नाः पृष्टाः

संवादकाले छात्रैः विद्यालयसम्बन्धिप्रकरणैः सह अन्यविषयेष्वपि प्रश्नाः पृष्टाः। एकादश्यकक्षायाः छात्रा सारा-नेगी मुख्यमन्त्रिणं अपृच्छत् यत् जनाः भवन्तं 'योद्धा' इति किमर्थं कथयन्ति। अस्य प्रश्नस्य उत्तरे मुख्यमन्त्रिणा उक्तं यत् सोऽपि एकस्माद् साधारपरिवारतः आगच्छति तथा च तेन जीवनपर्यन्तं सङ्घर्षः कृतः। जीवने आह्वानानां सम्मुखीकरणं करणीयं भवति तथा च कस्मिंश्चित् कार्ये असफलता अपि प्राप्यते, किन्तु यः जनः असफलतायाः प्राप्तावपि निरन्तरं कठोरपरिश्रमं करोति, सः अन्ते स्वलक्ष्यं प्राप्नोति तथा च सत्यविजेता भूत्वा उदेति। सः छात्रान् असफलताभिः निराशः न भवितुं परामृष्टवान्।

द्वादश्यकक्षायाः छात्रा जेसिका राज्यस्य कृते तस्य महत्तमे लक्ष्ये पृष्टे सति मुख्यमन्त्रिणा उक्तं यत् हिमाचलप्रदेशं आत्मनिर्भरं करणं तस्य सर्वोच्चा प्राथमिकता अस्ति।

द्वादश्यकक्षायाः छात्रा नेहा अपृच्छत् यत् ग्रामेषु पठन्तः बालाः नगरसदृशीम् अत्याधुनिकशिक्षां कथं प्राप्तुं शक्नुवन्ति। मुख्यमन्त्रिणा उक्तं यत् सी.बी.एस.ई.-विद्यालयस्य उद्घाटनं अस्यां दिशि स्वीकृतं प्रथमं पदमस्ति। सः अवदत् यत् राज्यसर्वकारः ग्रामीणक्षेत्रेषु शिक्षकाणां नियुक्तिं करोति तथा च शैक्षणिक-अधोसंरचनां (इन्फ्रास्ट्रक्चर) सुदृढां करोति।

दशमीकक्षायाः छात्रः विहीन-चौहानः अपृच्छत् यत् विधायकः भवितुं किमपि परीक्षणं (परीक्षा) किमर्थं न भवति। अस्य उत्तरे मुख्यमन्त्रिणा उक्तं यत् शिक्षकाः छात्रान् परीक्षाभ्यः सज्जीकुर्वन्ति, किन्तु विधायकभवनस्य परीक्षायै कोऽपि सज्जतां न कारयति। सः अवदत् यत् एषा परीक्षा प्रतिपञ्चवर्षं भवति तथा च जनता निर्वाचनं स्पर्धयन्तां प्रत्याशिनां भाग्यं निर्धारयति। यदा नागरिकाः स्वमताधिकारस्य सम्यग् उपयोगं कुर्वन्ति, तदैव योग्यं नेतृत्वं प्रकटयति। छात्रा अदिति-सूदः परामर्शं दत्तवती यत् विद्यालयेषु वैदेशिकभाषाः अपि पाठनीयाः। मुख्यमन्त्रिणा उक्तं यत् राज्यसर्वकारः द्वादश्याः परं वैदेशिकभाषाशिक्षणस्य अवसरान् उपकल्पयितुं प्रयतते।केचन छात्राः विद्यालयानां स्वच्छतायाः विषयमपि उत्थापितवन्तः। मुख्यमन्त्रिणा अवोचत् यत् विद्यालयेषु श्रेष्ठाः शौचालयसुविधाः विवस्यन्ते, यदि च कापि अभियोगः (शिकायत) स्यात् तर्हि छात्राः प्रधानाचार्येणापि सह सम्पर्कं कर्तुं शक्नुवन्ति।

# अष्टमासानन्तरं दिल्ली-लेह-मार्गे धाविता एच.आर.टी.सी.-बस-यानसेवा; ९९० किलोमीटर-परिमितस्य यात्रायाः शुल्कं १८३९ रूप्यकाणि

## प्रथमे दिवसे १५ यात्रिणः प्रस्थिताः; लाहौली-सम्प्रदायानुसारं 'खतक' (उत्तरीयं) परिधाप्य कृतं सम्मानम्

हिमसंस्कृतवार्ताः - कुल्लूः। देशस्य सर्वाधिकोन्नतभागात् गच्छति दिल्ली-केलाङ्ग-लेह-मार्गे निगमस्य (HRTC) बस-यानसेवा प्रारब्धा। मङ्गलवासरे प्रातः सार्धपञ्चवादने (०५:३०) केलाङ्गतः लेह-नगरं प्रति बस-यानं अन्ततः अष्टमासानन्तरं परं प्रस्थापितम्। अस्मिन् अन्तराले एच.आर.टी.सी. केलाङ्ग-आगारस्य आर.एम्. (RM) महोदयेन सह अन्ये अधिकारिणः कर्मचारिणः च उपस्थिताः आसन्। एच.आर.टी.सी. संस्थया अस्मिन् याने प्रेषितौ चालक-परिचालकौ विधिकृततया लाहौली-परम्परानुसारं 'खतक' परिधाप्य मार्गे यात्रां प्रति शुभाशंसाः दत्ताः।हिमाचलपथपरिवहननिगमस्य क्षेत्रीयप्रबन्धकः अंशितशर्मा प्रथमे दिवसे एच.आर.टी.सी. याने यात्रां कुर्वतः १५ पर्यटकान् अपि लाहौली-परम्परानुसारं अर्थात् 'खतक' परिधाप्य सम्मानितवान्। अधुना एषा यानसेवा पर्यटकान् देहल्याः लेह-पर्यन्तं ९९० किलोमीटर-परिमितं मार्गं १८३९ रूप्यकेषु कारयिष्यति। पर्यटकाः १६५०० पादोन्नतस्य बारालाचा-गिरिद्वारस्य, १५५४७ पादोन्नतस्य नाकुला-गिरिद्वारस्य, १३४८० पादोन्नतस्य तङ्गलाङ्ग-ला इत्यस्य तथा १६६१६ पादोन्नतस्य लाचुङ्गला-गिरिद्वारस्य दर्शनं कर्तुं शक्ष्यन्ति। अत्र पर्यटकानां कृते अल्पकालं यावत् यानं स्थग्यते, पर्यटकाश्च दर्रे छायाचित्रग्रहस्य (फोटोग्राफी) आनन्दं गृह्णन्ति।३० होरासु पूर्णा भविष्यति यात्रा एच.आर.टी.सी. केलाङ्ग-आगारस्य क्षेत्रीयप्रबन्धकः अंशितशर्मा अवदत् यत् दिल्ली-लेह-मार्गे बस-यानसेवा आरब्धा अस्ति। देशस्य सर्वोच्चे सुदीर्घे मार्गे यात्रिणः लेहतः दिल्ली-पर्यन्तं प्रायः ९९० किलोमीटर-परिमितं यात्रा केवलं ३० होरासु १८३९ रूप्यकैः कर्तुं शक्ष्यन्ति।

**दिल्लीतः लेह-नगरं प्रति यानप्रस्थानस्य समयः (Up Route)**

दिल्ली आई.एस.बी.टी. तः - मध्याह्ने १२:१० वादने
अम्बाला कैण्टतः - मध्याह्नात् परं ०३:५१ वादने
चण्डीगढ़-४३ तः - सायं ०६:२० वादने
मण्डीतः - रात्रौ १०:५५ वादने
कुल्लूतः - रात्रौ ०१:३० वादने
मनालीतः - रात्रौ ०२:३० वादने
केलाङ्गतः - प्रातः ०५:३० वादने
लेह-नगर आगमनम् - रात्रौ ०८:०० वादने (द्वितीये दिवसे)

## लेहतः दिल्ली-नगरं प्रति यानस्य समयसारणी (Down Route)

लेहतः - प्रातः ०३:३० वादने
केलाङ्गतः - सायं ०४:३० वादने
मनालीतः - रात्रौ ०९:०० वादने
चण्डीगढ़-१७ आगमनम् - रात्रौ/प्रातः ०५:३० वादने
दिल्ली आई.एस.बी.टी. आगमनम् - प्रातः ०८:३० वादने

## हिमाचल-पंचायत-निर्वाचनम्: प्रथमचरणस्य मतदानं सम्पन्नम्, द्वितीयचरणाय श्वः मतदानम्

हिमसंस्कृतवार्ताः शिमला । पंचायतीराज-संस्थानां द्वितीयचरणस्य निर्वाचनाय मङ्गलवासरे सायङ्काले प्रचारप्रसार-अभियानम् अवरुद्धं (शान्तं) जातम्। अधुना बृहस्पतिवासरे (वीरवारे) प्रदेशस्य १२७६ पंचायतेषु मतदानं भविष्यति। मतदानं प्रातः सप्तवादनात् आरभ्य अपराह्णे त्रिवादनपर्यन्तं प्रचलिष्यति। सम्पूर्णप्रदेशे प्रायः १८ लक्षाः (१८,००,०००) मतदातारः स्वस्य मताधिकारस्य प्रयोगं करिष्यन्ति।परिणाम-घोषणा सुरक्षा-प्रबन्धाः च सद्यः परिणामः: मतदानान्तरं पंचायत-स्तरस्य परिणामाः तस्यामेव सायङ्काले घोषयिष्यन्ते।


मतपेटिका-सुरक्षाः जिला-परिषदः बीडीसी (BDC) सदस्यानां च मतपेटिकाः आरक्षक-निरीक्षणे (पुलिस-निगरानी) सुदृढ-कक्षे (स्ट्रॉङ्ग रूम) सुरक्षिताः स्थापयिष्यन्ते।

**निर्वाचन-व्याप्तिः-** अस्मिन् चरणे ७३३४ वार्ड-क्षेत्रेषु निर्वाचनं भविष्यति।

**राज्य-निर्वाचन-आयोगस्य निर्देशः**

राज्य-निर्वाचन-आयोगेन निर्वाचनकार्ये नियुक्ताः अधिकारिणः कर्मचारिणः च विशेष-सतर्कतां पालयितुं आदिष्टाः।**आयोगस्य सचेतना-:** निर्वाचनप्रक्रियायां कस्यापि प्रकारस्य शिथिलता अथवा उपेक्षा प्राप्ता चेत्, सम्बद्ध-कर्मचारिणाम् विरुद्धं कठोर-कार्याचरणं (दण्डः) विधास्यते।संवेदनशील-अतिसंवेदनशील-मतदानकेन्द्रेषु अतिरिक्तम् आरक्षकबलं (पुलिस बल) संस्थापितम् अस्ति। प्रशासनिक-अधिकारिणः अपि तीक्ष्ण-निरीक्षणाय आदिष्टाः सन्ति।

# हिमाचल- पंचायतीराज- निर्वाचनेषु भाजपादलस्य ऐतिहासिकः विजयः, कांग्रेसदलस्य च करुणः पराजयः- जयरामठाकुरः



हिमसंस्कृतवार्ताः- मण्डी ।हिमाचलप्रदेशे आयोजितेषु पंचायतीराज- निर्वाचनानां प्रथमे चरणे प्रबुद्धया जनतया कांग्रेस-दलस्य जनविरोधिनीः नीतीः अस्वीकृत्य भारतीयजनतापार्टी (भाजपा) दलस्य पक्षे एकपक्षीयः प्रचण्डः च जनादेशः प्रदत्तः। अस्मिन् प्रथमे एव चरणे प्रदेशस्य प्रायः ७५ प्रतिशतं पंचायतेषु भाजपा-समर्थिताः प्रधान- उपप्रधान- प्रत्याशिनः ऐतिहासिकं विजयं प्राप्तवन्तः। अनेन स्पष्टं भवति यत् प्रदेशस्य ग्रामीणक्षेत्रेषु राष्ट्रवादस्य विकासस्य च नवीना तरङ्गा प्रचलति, ग्रामेभ्यः च कांग्रेस-दलस्य उन्मूलनम् आरब्धम्।भूतपूर्वमुख्यमन्त्री, विपक्षनेता च जयरामठाकुरः मण्डीनगरात् प्रसारिते प्रेसविज्ञप्तौ अवदत् यत् 'सराज' क्षेत्रे भाजपा-दलेन प्रथमे चरणे अभूतपूर्वः प्रदर्शनः कृतः। तत्र २८ पंचायतेषु २५ पंचायतेषु भाजपादलेन विजयध्वजः उत्पादितः, यत्र तु कांग्रेस-दलं केवलं द्वयोः स्थानयोः एव सन्तुष्टं जातम्। सराजक्षेत्रस्य प्रबुद्धजनतायाः अस्य प्रचण्डसमर्थनस्य आशीर्वादस्य च कृते कृतज्ञतां प्रकटयन् जयरामठाकुरः अवदत् यत् बहुवारं प्राकृतिक- आपदायाः दंशं सोढवत् सराजक्षेत्रं सर्वैः नवनिर्वाचित-प्रतिनिधिभिः सह मिलित्वा पुनः दृढतया उत्थापयिष्यते। सः प्रदेशस्य जनतां प्रति अस्य उत्तम-जनादेशस्य कृते धन्यवादं व्याहृतवान्, बृहस्पतिवासरे (वीरवारे) भवितुं द्वितीयचरणस्य पंचायत-निर्वाचनाय अपि जनतारीत्याः ईदृशस्य एव सहयोगस्य प्रबलां याचनां कृतवान्।विपक्षनेता वर्तमान-कांग्रेस-सर्वकारं प्रति तीक्ष्णं प्रहारं कुर्वन् अवदत् यत् अनेन सर्वकारेण असत्यं सम्भाष्य जनतां च भ्रमयित्वा सत्ता तु प्राप्ता, परन्तु सत्तागमनानन्तरं प्रदेशस्य विकासकार्याणि पूर्णरूपेण अवरुद्धानि कृतानि। जनता इदानीं एतत् सत्यं सम्यक् अवगच्छति यत् यदि ग्रामस्य क्षेत्रस्य च वास्तविकः विकासः करणीयः तर्हि भाजपादलेन सह एव अग्रे गन्तव्यं भविष्यति। सः पूर्णविश्वासं प्रकटितवान् यत् आगामिसमये प्रदेशे पुनः भाजपा- सर्वकारस्य गठनं निश्चितम् अस्ति, केन्द्रसर्वकारस्य सुदृढसहयोगेन च हिमहाचलप्रदेशे विकासचक्रं 'डबल-इञ्जन' गत्या अग्रे गमिष्यति। सः अवदत् यत् मुख्यमन्त्री जानाति स्म यत् निर्वाचनेषु परिणामः कांग्रेस-दलस्य पक्षे न आगमिष्यति, अतः सः एतानि निर्वाचनानि समये न अकारयत्, अद्य च षण्मासानां अतिरिक्तः समयः व्यतीतः जातः। अस्मिन् अवधौ यः विकासः पंचायतेषु भवितव्यः आसीत्, सः कांग्रेस- सर्वकारस्य मुख्यमन्त्रिणः च हठधर्मितायाः कारणेन स्थगितः अस्ति। केन्द्रसर्वकारातः निरन्तरं साहाय्यं प्राप्यते, परन्तु अनेन सर्वकारेण तत् जनान् प्रति प्रापयितुं विलम्बः कृतः।

अतिरिच्य, अन्यस्मिन् एकस्मिन् महत्त्वपूर्णे राजनैतिकघटनाक्रमे भूतपूर्वमुख्यमन्त्री जयरामठाकुरः सर्वोच्चन्यायालयस्य (सुप्रीम कोर्ट) आधुनिकां टिप्पणीं उद्धृत्य कांग्रेस-दलं भर्त्सितवान्। सः अवदत् यत् देशस्य सर्वोच्चन्यायालयेन एतत् स्पष्टीकृतं यत् 'विशेषगहनसमीक्षा' (एसआईआर) विधिसम्मता, वैधा, पूर्णतया च संविधानानुसारेण अस्ति। सर्वोच्चन्यायालयस्य अस्य महतः निर्णयस्य पश्चात् कांग्रेस-दलस्य तथाकथितं संविधानविरोधि वदनं देशस्य प्रदेशस्य च जनतायाः सम्मुखं पूर्णतया अनावरणं जातम्, यतः कांग्रेस-दलं इदानीं यावत् देशस्य जनतां केवलं 'वोट-बैङ्क' इत्यस्य निकृष्ट-राजनीतये वञ्चयति आसीत्, अनुप्रवेशकारिणाम् आश्रयेण च निर्वाचनेषु अनुचितं लाभं प्राप्तुं प्रयतते स्म। परन्तु अधुना देशे प्रदेशे च एषा तुष्टीकरणस्य वञ्चनायाः च राजनीतिः कदापि न चलिष्यति।



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

## वार्तासंवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य मया एका अद्भुता वार्ता श्रुता। भारते एकेन विदेशीययात्रिणा केवलं त्रिभिः निमेषैः वस्तु-वितरणं प्राप्तम्। सः आश्चर्यं प्राप्तवान् अस्ति।

**नन्दिनी-** सत्यम्, एतद् रोचते, किन्तु एतैः वितरण-कर्तृभिः मार्गेषु यातायात-बाधा क्रियते, येन पथिकानां गमनं कठिनं भवति। एतादृशी एव अन्या अपूर्वा वार्ता अस्ति। झारखण्ड-राज्ये एकेन शिक्षकेण इन्धन-मूल्य-वृद्धेः कारणात् जनगणनाकार्याय अश्व-पृष्ठस्य आश्रयः स्वीकृतः।

**काव्या-** अहो! तस्य शिक्षकस्य उपायः प्रशंसनीयः अस्ति। तेन इन्धनस्य रक्षणं कृतम्, पर्यावरणस्य अपि उपकारः जातः। पशूनां विषये वदामि चेत्, महाराष्ट्र-राज्ये एकेन तृषितेन वानरेण जलपानाय चलत् लोकयानं स्थगितम्।

**नन्दिनी-** अहो कारुण्यम्! दयालुभिः यात्रिभिः तस्मै जलं दत्तम्। सर्वेषु प्राणिषु करुणा कर्तव्या। परन्तु मानवाः कदाचित् अतीव मलिनाः भवन्ति। मलिनेन खाद्य-विक्रेत्रा भोज्य-पिष्टकानां पात्रे पादौ स्थापितौ। एतत् दर्शयन् एकः भीषणः चलच्चित्रखण्डः जनैः दृष्टः।

**काव्या-** एतत् अतीव घृणास्पदम् अस्ति! जनैः स्वास्थ्य-रक्षणं न कृतम् चेत् महाव्याधिः उत्पत्स्यते। एतादृशः खाद्यविक्रेता लोहपथग-विभागेन दण्डितः भवेत्। अद्य बहुविधाः विचित्राः वार्ताः अस्माभिः चर्चिताः।

**नन्दिनी-** सत्यम्। इतः परं सावधानता आवश्यकी। श्वः पुनः मिलिष्यामः। नमो नमः।

# मुख्यमन्त्रिणा सुक्खुना 'सिटी लिमिट्स' इति पुस्तकस्य कृतं विमोचनम् अकथयत् च पर्यावरणसन्तुलनं सुनियोजितनिर्माणं च राज्यस्य प्राथमिकता



**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः शिमला-नगरस्य 'गेयटी थियेटर' इत्यत्र नगरनिगम-शिमला-नगरस्य पूर्व-उपमहापौर-टिकेन्द्रपंवरेण सम्पादितायाः 'सिटी लिमिट्स-द क्राइसिज़ ऑफ अर्बनाइजेशन' (नगरीकरणस्य सङ्कटम्) इति पुस्तकस्य विमोचनं कृतवान्। अस्मिन् अवसरे मुख्यमन्त्रिणा उक्तं यत् प्रकृत्या हिमाचलप्रदेशाय स्वच्छवायोः जलस्य च उपहारः प्रदतः, एतेषां संसाधनानां संरक्षणं च प्रत्येकं नागरिकस्य सामूहिकम् उत्तरदायित्वं वर्तते।मुख्यमन्त्रिणा प्रतिपादितं यत् गतेषु त्रिषु वर्षेषु हिमाचलप्रदेशेन द्वे महत्यौ प्राकृतिकविपदौ सोढे, याभ्यां राज्यस्य महती हानिः अभवत्। सः अवदत् यत् सम्प्रति मेघविस्फोटस्य (बादल फटने की) घटनानां वैज्ञानिकम् अध्ययनं क्रियमाणं वर्तते, यतो हि ईदृश्यः घटनाः अधुना केवलम् उन्नतक्षेत्रेषु सीमिताः न सन्ति, अपितु अधोवर्तिषु क्षेत्रेष्वपि घटन्ते। सः सिराज-विधानसभाक्षेत्रस्य केषुचित् भागेषु घटितानां घटनानाम् अपि उल्लेखं कृतवान्।मुख्यमन्त्रिणा उक्तं यत् गृहमन्त्रिणा सह आयोजितायाः सभायाः अवधौ तेन केन्द्रीयमन्त्री अवगतः कृतः आसीत् यत् भविष्ये मेघविस्फोटस्य घटनाः केवलं हिमाचलप्रदेशपर्यन्तं सीमिताः न स्थास्यन्ति। ईदृश्यः घटनाः उत्तराखण्डे पूर्वोत्तरराज्येषु च अपि वर्धितुं शक्नुवन्ति। पर्यावरणसंरक्षणं सामाजिकसन्तुलनम् च ध्याने निधाय राज्यसर्वकारः हिमाचलप्रदेशं विकासपथे अग्रे नेतुं दृढसङ्कल्पशक्त्या कार्यं करोति।

सः अवदत् यत् राज्यस्य राजधान्याः बृहत्तमस्य नगरस्य च रूपेण शिमला-नगरेण गतेषु कतिपयेषु वर्षेषु अनेकानि परिवर्तनानि दृष्टाणि। सः न्यवेदयत् यत् सः बाल्यकालाद् आरभ्य अद्यावधि शिमला-नगरे जायमानानि परिवर्तनानि पश्यन् अस्ति। यत्र पूर्वं वनानि आसन्, तत्र अधुना भवनानि निर्मितानि। हिमाचलप्रदेशस्य भौगोलिकस्थितिं दृष्ट्वा अत्र सुनियोजितं निर्माणम् आवश्यकं वर्तते।मुख्यमन्त्रिणा प्रतिपादितं यत् शिमला-नगरं तन्तूनां जालात् मुक्तिं दापयितुम् १४५ कोटिरूप्यकाणां व्ययेन भूमिगत-'डक्ट'-परियोजना क्रियान्वियते। सम्प्रति शाकविपणि (सब्जी मंडी) क्षेत्रे ६०० कोटिरूप्यकाणां व्ययेन एकः आधुनिकः परिसरः विवस्यते। 'लिफ्ट' इत्यस्य समीपे अपि एकः भूमिगतमार्गः ('अंडरपास') प्रस्तावितः अस्ति। सः अवदत् यत् शिमला-नगरे २४ होरासु जलस्य उपलब्धतां सुनिश्चितं कर्तुं ८०० कोटिरूप्यकाणां जलापूर्ति-योजना क्रियान्विता क्रियते। एतदतिरिच्य, वर्तुलाकारमार्गस्य (सर्कुलर रोड) विस्तीर्णीकरणाय भूमि-अधिग्रहणस्य कार्यं प्रचलति, नगरस्य सौन्दर्यं रक्षितुं च अधिसूचितानां हरितक्षेत्राणां वर्धनाय प्रयतन्ते।राज्यसर्वकारस्य सततविकासं रेखाङ्कितं कुर्वन् मुख्यमन्त्रिणा उक्तं यत् पर्यावरणसन्तुलनं केन्द्रीकृत्य शिमला-नगरस्य सौन्दर्यीकरणाय अनेकाः परियोजनाः सञ्चाल्यन्ते। सः अवदत् यत् 'हिम-चण्डीगढ़', 'हिम-पञ्चकूला' तथा काङ्ड़ा-क्षेत्रे 'एयरो सिटी' सदृशाः नवीनाः नगरीकरणपरियोजनाः सज्जीक्रियन्ते। अत्र अतिरिक्तं, पर्यटनसम्बद्धा अधोसंरचना (इन्फ्रास्ट्रक्चर) अपि सुदृढा क्रियते।

# अखिलभारते महत्तमकपालास्थ्यर्बुदशल्यक्रियासाफल्येन एम्सपाटलिपुत्रसंस्थानस्य नाम लिम्काभिलेखपुस्तके समलिखितम्



**हिमसंस्कृतवार्ताः राघव नाथ झा।**
अखिलभारतीय- आयुर्विज्ञानसंस्थानं, पाटलिपुत्रं (एम्स-पाटलिपुत्रम्) न्यूरोशल्यचिकित्साक्षेत्रे ऐतिहासिकी-मुपलब्धिं सम्पाद्य प्रतिष्ठितायां "लिम्काभिलेखपुस्तिकायाम्" स्वकीयं नाम समलिखितवत्। संस्थानस्य न्यूरोशल्यचिकित्सा-विभागस्य अतिरिक्तप्राध्यापकः डॉ. सरोजकुमारसिंहः स्वकीयचिकित्सकदलस्य सहयोगेन भारतवर्षे अद्यावधि सम्पन्नासु कपालास्थ्यर्बुदशल्यक्रियासु महत्तमतमां शल्यक्रियां सफलतया सम्पन्नवान्।एषा दुष्करा शल्यक्रिया एम्सपाटलिपुत्रसंस्थाने एकोनत्रिंशद्वर्षीयस्य पुरुषरोगिणः उपरि सम्पन्ना। तस्य शिरसि द्वाविंशतिसेण्टीमीटरदीर्घः षोडशसेण्टीमीटरविस्तृतः सप्तसेण्टीमीटरोन्नतश्च प्रायः अष्टशतत्रिंशद्ग्रामभारयुक्तः विशालः कपालास्थ्यर्बुदः आसीत्। लिम्काभिलेख-पुस्तिकया प्रदत्ताधिकारिक-प्रमाणपत्रानुसारम् एषा शल्यक्रिया २१-०२-२०२४ तमे दिने सम्पन्ना। प्रातः नववादने आरब्धा एषा प्रक्रिया सायं चतुर्वादनपञ्चचत्वारिंशन्मिनटपर्यन्तं प्रवृत्ता। प्रायः सप्तघण्टापञ्चचत्वारिंशन्मिनटपर्यन्तं प्रवृत्तामिमां सूक्ष्मदुष्करशल्यप्रक्रियां चिकित्सकदलम् अत्यन्तसफलतया सम्पन्नवत्।विशेषज्ञानां मतानुसारम् अर्बुदस्य असाधारणपरिमाणं भारश्च एतां शल्यक्रियां अत्यन्तसंवेदनशीलां तकनीकीदृष्ट्या च जटिलां कृतवन्तौ। अत्याधुनिक-प्रौद्योगिक्या सूक्ष्मपूर्वयोजनया बहुविषयक-वैद्यविशेषज्ञतया च एषा दुर्लभशल्यक्रिया सफलतया सम्पन्ना।एम्सपाटलिपुत्रसंस्थानस्य कार्यपालकनिदेशकः प्रो. ब्रिगेडियर डॉ. राजूअग्रवालः अस्याः ऐतिहासिकोपलब्धेः उपलक्ष्ये डॉ. सरोजकुमारसिंहं सम्पूर्णचिकित्सकदलञ्च हार्दम-भिनन्दितवान्। तेन उक्तं यत् लिम्काभिलेखपुस्तके समलिखिता एषा उपलब्धिः न केवलम् एम्सपाटलिपुत्रसंस्थानस्य, अपि तु समग्रबिहार-राज्यस्यापि गौरवविषयः अस्ति। तेन पुनरुक्तं यत् एम्सपाटलिपुत्रसंस्थानं निरन्तरम् उन्नतविश्वस्तरीय-स्वास्थ्यसेवाप्रदाने समर्पितभावेन कार्यं करोति।

## संस्कृतभाषायां समस्तं ज्ञानविज्ञानं निहितम्- प्रो. मोहनचन्द्रपाण्डेयः (सप्तदिवसीयं संस्कृतसम्भाषणशिविरं सम्पन्नम्)



**हिमसंस्कृतवार्ताः- डॉ. मूलचन्द्रशुक्लः रामनगरम्।** रामनगरे संस्कृतभारत्याः उत्तराञ्चलप्रान्तस्य समायोजितं सप्तदिवसीयं संस्कृत- सम्भाषण- शिविरम्। अद्य पीएम- श्री- राजकीय- बालिकान्तरविद्यालयस्य नेताजीसुभाष- चन्द्रबोस- छात्रावासनिविष्टे सभागारे सानन्दं सम्पन्नम्। समापनावसरे अतिथिभिः प्रतिभागिभ्यः पुरस्काराः प्रमाणपत्राणि च वितरितानि।समापनसत्रे मुख्यातिथिरूपेण पीएनजी- राजकीय- स्नातकोत्तर- महाविद्यालयरामनगरस्य प्राचार्यः प्रो. मोहनचन्द्रपाण्डेयः उपस्थित आसीत्। स्वीयसम्बोधने तेनोक्तं यत्- संस्कृतभाषायां समस्तं ज्ञानविज्ञानं समाहितम् अस्ति। अद्यतनवैज्ञानिक-युगेऽपि संस्कृतस्य महत्त्वं निरन्तरं वर्धते। समाजः, अर्थशास्त्रम्, विज्ञानम्, सङ्गीतम्, नृत्यम्, कला, दर्शनं च एतेषां सर्वेषां मूलाधारः संस्कृतमेव वरीवर्ति। संस्कृतं विना भारतीयज्ञानपरम्परायाः सम्यगवगमनं न सम्भवति। विशिष्टातिथिरूपेण उत्तराखण्ड- विद्यालयीय- शिक्षापरिषदः संयुक्तसचिवः सी. पी. रतूडी महोदयः अपि उपस्थितः। सः स्वीयभाषणे उक्तवान् यत् भाषायाः जीवन्तता तस्याः व्यवहारसम्भाषणे एव निहिता भवति। अतः संस्कृतभाषायाः संरक्षणाय संवर्धनाय च एतादृशानां सम्भाषणशिविराणा-मत्यन्तमावश्यकता वर्तते।कार्यक्रमस्य प्रारम्भे शिविरसंयोजकः डॉ. सत्यप्रकाशमिश्रः पुष्पगुच्छैः सर्वेषामतिथीनां हार्दिकं स्वागतं कृत्वा शिविरस्य विविधोपलब्धीनां विवेचनम् अकरोत्। डॉ. आशुतोषसतेः सुचारुसञ्चालने सम्पन्ने अस्मिन् समारोहे शिविरस्य प्रतिभागिभिः संस्कृत-सम्भाषणाधारिताः विविधाः सांस्कृतिककार्यक्रमाः प्रस्तुताः, येषां माध्यमेन शिविरस्य अभ्यासफलानि सजीवतया प्रदर्शितानि। रामनगरमहाविद्यालयस्य संस्कृतविभाग-प्रभारी सहायकप्राध्यापकः अतिथिवक्ता च डा० मूलचन्द्रशुक्लः स्वभाषणे उक्तवान् यत् यदि छात्राः दैनिकजीवने संस्कृतसम्भाषणस्य प्रयोगं कुर्वन्ति तर्हि संस्कृतभाषायाः व्यवहारिकविकासः स्वयमेव भविष्यति। सम्भाषणमेव संस्कृतप्रचारप्रसारयोः सर्वाधिकं प्रभावकरं साधनम् इति।विद्यालयीयशिक्षापरिषदः शोधाधिकारी डा० रामचन्द्रपाण्डेयः छात्रान् प्रेरयन् उक्तवान् यत् संस्कृतसम्भाषणेन छात्राः समाजे सांस्कृतिकचेतनायाः प्रसारं करिष्यन्ति इति दृढो विश्वासः अस्ति।अन्ते छात्रावासस्य सञ्चालिका श्रीमती सीमा आर्या समेषामतिथीनां सहभागिनां च धन्यवादज्ञापनम् अकरोत्। अस्मिन् समारोहे दर्शनसिंहः, पूजा रावत, मानसी अग्रवालः, अञ्जलि-अधिकारी, स्नेहा, मेघाराणा, शिवानी, सुनीता, नीलमवर्मा इत्यादयः बहवः गणमान्या उपस्थिता आसन्।

## जलजीवनहरियाली"-अभियानेन भूजलसंरक्षणे अभूतपूर्वा सफलता




मन्त्रिणा उक्तं यत् राज्यस्य ९३ प्रतिशताधिकग्रामीणपरिवाराः अधुना शुद्धपेयजललाभेन लाभान्विताः सन्ति। १,१४,४५० वार्डेषु जलापूर्तियोजनाः सुचारुरूपेण सञ्चाल्यन्ते।मुख्यमन्त्रिणः मार्गदर्शने सञ्चालितस्य "जलजीवनहरियाली"-अभियानस्य सकारात्मकपरिणामाः सम्प्रति स्पष्टतया दृश्यन्ते। भूजलस्तरस्य "अतिगम्भीर"-श्रेण्यां स्थितानां पंचायतानां संख्या १३८ तः न्यूनीभूय केवलं १९ इति अवशिष्टा, यत् राज्यस्य जलसंरक्षणनीतेः महती उपलब्धिः अस्ति।मन्त्रिणा एतदपि प्रतिपादितं यत् विभागीययोजनाभिः ग्रामीणप्रदेशेषु द्विलक्षाधिकजनानां कृते स्थानीयस्तरे रोजगारावसराः सृजिताः। बह्व्यः ग्रामीणमहिलाः पम्पसञ्चालिकात्वेन कार्यं कुर्वन्त्यः आत्मनिर्भरतायाः दिशि अग्रे प्रसरन्ति।

## जनसुविधासुदृढीकरणाय त्वरित-समाधानव्यवस्था तथा हाइटेक्-जलयानत्रयोजना

जनसुविधार्थं विभागेन "नलजलशिकायत"-नामकः चलदूरभाषानुप्रयोगः तथा केन्द्रीकृतशिकायतनिवारणव्यवस्था पूर्वमेव प्रवर्तिता अस्ति। अधुना नागरिकाः स्वसमस्यासमाधानार्थं विभागस्य प्रधानसचिवस्य चलदूरभाषसङ्ख्यायां ९४७३१९१४६६ इत्यत्र प्रत्यक्षतया व्हाट्सएप-सन्देशान् प्रेषयितुमपि समर्थाः भविष्यन्ति।मन्त्रिणा अधिकारिभ्यः निर्देशः प्रदत्तः यत् मोटरदाहः, पाइपरेखाछिद्रता इत्यादयः समस्याः चतुर्विंशतिघण्टाभ्यन्तरे एव निराकर्तव्याः। विशेषतः महादलितटोलेषु अवशिष्टकार्याणि आगामित्रिमासाभ्यन्तरे सम्पन्नानि भविष्यन्ति।श्रावणीमेलादिषु विशालधार्मिक-सांस्कृतिकसमागमेषु श्रद्धालूनां कृते शुद्धपेयजलोपलब्ध्यर्थं १०० नवीन-हाइटेक्-जलयानत्राणां स्थापना अपि करिष्यते।अन्ते मन्त्रिणा उक्तं यत् "प्रत्येकनागरिकस्य स्वास्थ्यं, स्वच्छता, समृद्धिश्च राज्यशासनस्य सर्वोच्चप्राथमिकता अस्ति" इति। एतदेव ध्येयमादाय विभागः निरन्तरं जनसेवार्थं समर्पितभावेन कार्यरतः

# अराजकतया सह कश्चिदपि सन्धि न, बिहारे केवलं सुशासनमेव प्रवर्तिष्यते, सुशासनेनैव समृद्धिरागमिष्यति— विजयकुमारसिन्हः



**हिमसंस्कृतवार्ताः राघव नाथ झा।** बिहारराज्यस्य माननीयः कृषिमन्त्री श्रीविजयकुमारसिन्हः राज्ये सुशासनस्य, पारदर्शितायाः कृषकसमृद्धेश्च दृढसंकल्पं पुनरुच्चारितवान्। तेन स्पष्टतया उक्तं यत् भ्रष्टाचार-अपराध-दलालतन्त्रस्य विरुद्धं कठोरकार्यवाही विधास्यते। बिहारराज्यं भय-भ्रष्टाचार-अपराधप्रधानराजनीतेः बहिर्नेतुं राष्ट्रियजनतान्त्रिकगठबन्धनस्य शासनं जनविश्वासेन सह कदापि सम्झौतां न करिष्यति।श्रीसिन्हेन उक्तं यत् वर्तमानशासनं “शून्यसहिष्णुतानीत्या” कार्यं करोति, यत्र अपराधस्य, भ्रष्टाचारस्य, अवैधधनग्रहणस्य, दरिद्राधिकारलुण्ठनस्य च किमपि स्थानं नास्ति। पूर्वव्यवस्थायाः आलोचनां कुर्वन् तेन उक्तं यत् पूर्वकाले कृषकाणां श्रमार्जितं धनं दलालभ्रष्टतन्त्रस्य ग्रासो भवति स्म, किन्त्वधुना द्वियन्त्रशासने व्यवस्थायां व्यापकपरिवर्तनं कृत्वा कृषक-श्रमिक-युवा-दरिद्रजनानामधिकाररक्षणाय प्रयत्नः क्रियते।तेन उक्तं यत् राज्ये द्विकोट्यधिकाः अष्टादशलक्षाधिकाश्च पञ्जीकृतकृषकाः सन्ति तथा च चतुःकोट्यधिकाः भूमिपञ्जिकाः सन्ति। एषा शासनस्य महती चुनौती अस्ति, यस्य समाधानार्थं कृषिविभागः राजस्वभूमिसुधारविभागश्च संयुक्तरूपेण कार्यं करिष्यतः। क्षेत्रेषु प्रखरातपे वर्षासु च परिश्रमं कुर्वतां कृषकाणां स्वेदबिन्दवः एव बिहारस्य वास्तविकसम्पत्तिः इति तेन उक्तम्। यदि कश्चित् कृषकहितेषु आघातं कर्तुं प्रयतते, तर्हि सः कियत् प्रभावशाली भवतु, तस्य विरुद्धं कठोरवैधानिकी कार्यवाही अनिवार्यतया भविष्यति। “अन्नदातुः अपमानः बिहारे कदापि न सह्यः” इति तेन दृढतया प्रतिपादितम्।

कृषिमन्त्रिणा उक्तं यत् कृषिविभागे पारदर्शिता-उत्तरदायित्वयोः सुनिश्चित्यर्थं खाद-बीज-कृषियन्त्र-कृषिसाहाय्यसम्बद्धाः प्रक्रियाः व्यापकतया सङ्गणकीकृताः सन्ति, येन दलालभ्रष्टतत्त्वानां भूमिका पूर्णतया समाप्ता भवेत्। तेन अधिकारिणः प्रति कठोरचेतावनी दत्ता यत् यदि कस्यचित् प्रखण्डे जनपदे वा कृषकात् अवैधवसूली-उत्कोचग्रहणस्य अभियोगः प्राप्स्यते, तर्हि दोषिणां विरुद्धं विभागीयकार्यवाहीमात्रं न, अपितु प्रत्यक्षवैधानिकी कार्यप्रक्रिया कृत्वा कारागारप्रेषणपर्यन्ता प्रक्रिया अपि क्रियिष्यते।

श्रीसिन्हेन उक्तं यत् बिहारस्य कृषकः केवलम् अन्नदाता न, अपितु राज्यस्य अर्थव्यवस्थायाः मेरुदण्डः अस्ति। यावत् ग्रामाः सुदृढाः न भविष्यन्ति, कृषकाः समृद्धाः न भविष्यन्ति, युवभ्यः रोजगारावकाशाः न लप्स्यन्ते, तावत् विकसितबिहारस्य स्वप्नम् अपूर्णमेव भविष्यति। शासनं कृषकाणां सुरक्षा-सम्मान-समृद्ध्यर्थं पूर्णप्रतिबद्धतया कार्यं करोति तथा च ग्रामप्रदेशेषु भय-अपराधवातावरणं प्रसारयितुं प्रयतमानाः दुष्टतत्त्वाः कदापि न सहिष्यन्ते।

तेन उक्तं यत् माननीयप्रधानमन्त्री श्रीनरेन्द्रमोदिनः नेतृत्वे “सर्वेषां सहयोगः, सर्वेषां विकासः, सर्वेषां विश्वासः, सर्वेषां प्रयासः” इति मन्त्रं आत्मसात्कृत्य बिहारशासनं सुशासनं जनान्दोलनरूपेण प्रतिष्ठापयति। एतत् शासनं सत्तां सेवामाध्यमरूपेण पश्यति तथा च अन्तिमपङ्क्तिस्थितानां दरिद्र- कृषक- श्रमिकयुवजनानां जीवनपरिवर्तनाय संकल्पितम् अस्ति। अन्ते तेनोक्तं यत् बिहारम् अव्यवस्थायाः प्रतीकं न, अपि तु विकास-सुशासन- आत्मविश्वासानां नूतनप्रतीकं भविष्यति। “जनतैव लोकतन्त्रस्य वास्तविकस्वामिनी अस्ति। जनादेशस्य विश्वासरक्षणार्थम् अहम् अन्तिमश्वासपर्यन्तं संघर्षं करिष्यामि। विकसितबिहारः समृद्धकृषकश्च अस्माकं राजनैतिक- सामाजिक- संकल्पस्य मूलाधारः अस्ति” इति तेन दृढतया प्रतिपादितम्।

# संस्कृतं मधुरं सदा- ४२




प्राक्तनैः सूरिभिः यावन्तः संस्कृतग्रन्थाः प्रणीताः, ते सर्वेऽपि ग्रन्थाः काव्योपेताः वर्तन्ते, मन्त्रादयो हि गद्येन लिखिता प्राप्यन्ते। परं काव्यशास्त्रं विविधच्छन्दोभिः सज्जीकृतमस्ति। छन्दश्शास्त्रं संस्कृतवाङ्मयस्य एकम् अविच्छेद्याङ्गं वर्तते। एतेषु ग्रन्थेषु यथा अनुष्टुप्-छन्दसः आधिपत्यं, तथैव त्रिष्टुप्- छन्दसोऽपि बाहुल्यं न न्यूनम्। विशेषतः काव्येषु एकादशाक्षराणां समूहत्वात् तत् त्रिष्टुप्-छन्दः आख्यायते। चतुश्चरणानि भवन्ति। यथा-इन्द्रवज्राछन्दः एवं भवति-

***निर्मानमोहा जितसङ्गदोषा- अध्यात्मनित्या विनिवृत्तकामाः। द्वन्द्वैर्विमुक्ताः सुखदुः खसञ्ज्ञै- र्गच्छन्त्यमूढाः पदमव्ययं तत्।।***

त्रिष्टुप्-छन्दसः नानाभेदाः स्युः। यथा, सूत्रेण सह-
इन्द्रवज्रा- स्यादिन्द्रवज्रा यदि तौ जगौ गः। (उपरितनम्) उपेन्द्रवज्रा- उपेन्द्रवज्रा जतजास्ततो गौ। **शालिनी-** शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः। **ईहामृगी-** ईहामृगी किल चेत्तो भतौ गौ। प्राकारबन्ध- प्राकारबन्धस्तकारत्रयं गौ।
**वातोर्मी-** वातोर्मीयं कथिताम्भौ तगौ गः।
**संश्रयश्री-** ताः स्युस्त्रयः संश्रयश्रीर्गलौ च।
**गुणांगी-** म्तौ ज्गौ गः स्यादब्धिर्नगगुणांगी।
वंशस्थ- जतौ तु वंशस्थमुदीरितं जरौ।
राधा- यतौ यौ राधा शरलोकैर्यतिः स्यात्।
इत्यादयः त्रिष्टुप्-छन्दसः २०३८-संख्यकाः भेदाः उपलभ्यन्ते छन्दश्शास्त्रे। अत्र प्रधानतया उपयुज्यमानानि छन्दांसि तु इन्द्रवज्रा, उपेन्द्रवज्रा, शालिनी इत्यादीन्येव स्युः इति, शुभम्।

# मधुमधुरलघुस्वादुकविताकेलयः (Sanskrit Version Shorts Of Hindi Film Songs)

## रचयिता - डा.रुरुकुमारमहापात्रः

जो मेरी रूह को चैन दे प्यार दे
वो ख़ुशी बन गये हो तुम
ज़िन्दगी बन गये हो तुम
जिन्दगी बन गये हो तुम

**संस्कृतम्**

यन्मयि आत्मनि शान्तिदं प्रेमदं तत्सुखम् अभूः हि त्वम् जीवनम् अभूः हि त्वम् जीवनम् अभूः हि त्वम्




# संस्कृत-शिक्षणे अनुसन्धानस्य विधयः' इति विषये दिल्लीसंस्कृताकादम्या भव्यकार्यशाला सम्पन्ना

हिमसंस्कृतवार्ताः- वत्सदेशराजशर्मा। मईमासस्य त्रयोविंशतिः दिनाङ्के इन्द्रप्रस्थनगरी- विराजमान-दिल्लीसर्वकार- कलासंस्कृति- भाषाविभागाधीन-दिल्ली- संस्कृताकादमी- प्रतिष्ठानद्वारा षड्विंशत्यधि-कद्विसहस्रतमवर्षस्य मईमासस्य त्रयोविंशतितमे दिनाङ्के शनिवासरे झण्डेवालानकरोलबागपरिसराधिष्ठिते भव्यसभागारे 'संस्कृतशिक्षणे अनुसन्धानस्य विधयः' इति विषयमधिकृत्य काचिदपूर्वा संस्कृतशिक्षणकार्यशाला साफल्येन समनुष्ठिता। अस्याः खलु ज्ञानयज्ञस्वरूपा-योजनायाः शुभारम्भोऽतिपावनमङ्गलमय-तपोवनतुल्याध्यात्मिकवातावरणे श्रीहरिप्रिया-संस्कृतवैदिकगुरुकुलस्य ब्रह्मचारि-बटुभिः सस्वरसविधिकृत- मङ्गलमय- स्वस्तिवाचन-पुरस्सरं सञ्जातो येन हि सम्पूर्णः सभागारः पुनीतवैदिकमन्त्रोच्चारण- समुत्पन्न-सकारात्मक-शक्तिप्रवाहेण निनादितोभूत्। अस्मिन्गरिममये सारस्वत-महोत्सवे मुख्यवक्तृपीठमधिष्ठितवन्तो नवनवोन्मेष-शालिनी- प्रज्ञासम्पन्नाः प्रज्ञाशिक्षण- महाविद्यालय-बहादुरगढपरिसरस्य प्राचार्या डॉ. दिलीप-कुमारझामहोदया यैः खलु संस्कृतशिक्षणप्रक्रियायाम् आधुनिक- अनुसन्धानविधीनां नूतनशोधप्रणालीनां व्यावहारिकप्रयोगाणाञ्च विषये स्वकीयप्रगल्भ-पाण्डित्यपूर्णगम्भीरगिरा सुविस्तृतप्रकाशप्रसारणेन समुपस्थित-शिक्षकवृन्दस्य कुशलमार्गदर्शनं विहितम्। किञ्चास्मिन्सारस्वतसमागमे- ऽगाधज्ञान-गरिमागौरवान्वितानां श्रीहरिप्रिया- संस्कृत- वैदिक-गुरुकुलस्य प्रधानाचार्याणां श्रीदण्डपाण्याचार्याणां गरिमामयी विशिष्टा च समुपस्थितिः समेषामपि मोदाय कल्पते स्म तैरतिरिक्तं नानादिगन्तसमागता अन्येऽपि लब्धप्रतिष्ठा विद्वांसः शिक्षाविदो गणमान्या अतिथयश्च तत्र विराजमान आसन्। अस्याञ्च ज्ञानवर्धिन्यां कार्यशालायामिन्द्रप्रस्थ- महानगरात्तत्परिसरवर्ति-विभिन्नविद्यालय- महाविद्यालयेभ्यश्च समागतानां संस्कृतशिक्षकाणां सोत्साहं महती सङ्ख्या समुपस्थितासीद्यैश्च स्वकीयभविष्यकालिक- शिक्षणशोध-कार्येषु नितान्तलाभदायकानि नूतनानुसन्धान-तन्त्रसम्बद्धानि महत्त्वपूर्णानि ज्ञानरत्नानि समुपार्जितानि। अन्ते चाकादमीपक्षतः सर्वेषां मञ्चासीनानामतिथीनां वक्तृणां प्रतिभागिशिक्षकाणाञ्च कृते हार्दिकी कृतज्ञता ज्ञापिता